कापिलवत्थवे सक्ये बहुदेव रत्तिं धम्मिया कथायाति एत्थ धम्मकथा नाम सन्थागारानुमोदनापटिसंयुत्ता पकिण्णककथा वेदितब्बा। तदा हि भगवा आकासगङ्गं ओतारेन्तो विय पथवोजं आकड्ढन्तो विय महाजम्बुं मत्थके गहेत्वा चालेन्तो विय योजनिकं मधुभण्डं चक्कयन्तेन पीळेत्वा मधुपानं पायमानो विय कपिलवत्थुवासीनं सक्यानं हितसुखावहं पकिण्णककथं कथेसि। ‘‘आवासदानं नामेतं, महाराज, महन्तं, तुम्हाकं आवासो मया परिभुत्तो, भिक्खुसङ्घेन च परिभुत्तो, मया च भिक्खुसङ्घेन च परिभुत्तो पन धम्मरतनेन परिभुत्तोयेवाति तीहि रतनेहि परिभुत्तो नाम होति। आवासदानस्मिञ्हि दिन्ने सब्बदानं दिन्नमेव होति। भुम्मट्ठकपण्णसालाय वा साखामण्डपस्स वापि आनिसंसो नाम परिच्छिन्दितुं न सक्का। आवासदानानुभावेन हि भवे भवे निब्बत्तस्सापि सम्बाधितगब्भवासो न होति, द्वादसहत्थो ओवरको विय मातुकुच्छि

असम्बाधोव होती''ति। एवं नानानयविचित्तं बहुं धम्मिं कथं कथेत्वा –

''सीतं उण्हं पटिहन्ति, ततो वाळमिगानि च।
सिरीसपे च मकसे, सिसिरे चापि वुट्ठियो॥

''ततो वातातपो घोरो, सञ्जातो पटिहञ्ञति।
लेणत्थञ्च सुखत्थञ्च, झायितुञ्च विपस्सितुं॥

''विहारदानं सङ्घस्स, अग्गं बुद्धेन वण्णितं।
तस्मा हि पण्डितो पोसो, सम्पस्सं अत्थमत्तनो॥

''विहारे कारये रम्मे, वासयेत्थ बहुस्सुते।
तेसं अन्नञ्च पानञ्च, वत्थसेनासनानि च॥

''ददेय्य उजुभूतेसु, विप्पसन्नेन चेतसा।
ते तस्स धम्मं देसेन्ति, सब्बदुक्खापनूदनं।
यं सो धम्मं इधञ्ञाय, परिनिब्बाति अनासवो''ति॥ (चूळव॰ २९५) –

एवं ''अयम्पि आवासे आनिसंसो, अयम्पि आवासे आनिसंसो''ति बहुदेव रत्तिं अतिरेकतरं दियड्ढयामं आवासानिसंसकथं कथेसि। तत्थ इमा ताव गाथाव सङ्गहं आरुळ्हा, पकिण्णकधम्मदेसना पन सङ्गहं नारोहति। **सन्दस्सेत्वा**तिआदीनि वुत्तत्थानेव।

अभिक्कन्ताति अतिक्कन्ता द्वे यामा गता। **यस्स दानि कालं मञ्ञथा**ति यस्स तुम्हे गमनस्स कालं मञ्ञथ, गमनकालो तुम्हाकं, गच्छथाति वुत्तं होति। कस्मा पन भगवा ते उय्योजेसीति? अनुकम्पाय। सुखुमाला हि ते, तियामरत्तिं निसीदित्वा वीतिनामेन्तानं सरीरे आबाधो उप्पज्जेय्य। भिक्खुसङ्घोपि महा, तस्स ठाननिसज्जानं ओकासो लद्धुं वट्टतीति उभयानुकम्पाय उय्योजेसि।

विगतथिनमिद्धोति तत्र किर भिक्खू यामद्वयं ठितापि निसिन्नापि अचालयिंसु, पच्छिमयामे पन आहारो परिणमति, तस्स परिणतत्ता भिक्खुसङ्घो विगतथिनमिद्धो जातोति अकारणमेतं। बुद्धानञ्हि कथं सुणन्तस्स कायिकचेतसिकदरथा न होन्ति, कायचित्तलहुतादयो उप्पज्जन्ति, तेन तेसं द्वे यामे ठितानम्पि निसिन्नानम्पि धम्मं सुणन्तानं थिनमिद्धं विगतं, पच्छिमयामेपि सम्पत्ते तथा विगतमेव जातं। तेनाह ''विगतथिनमिद्धो''ति।

पिट्ठि मे आगिलायतीति कस्मा आगिलायति? भगवतो हि छब्बस्सानि महापधानं पदहन्तस्स महन्तं कायदुक्खं अहोसि, अथस्स अपरभागे महल्लककाले पिट्ठिवातो उप्पज्जीति। अकारणं वा एतं। पहोति हि भगवा उप्पन्नं वेदनं विक्खम्भेत्वा एकम्पि द्वेपि सत्ताहानि एकपल्लङ्केन निसीदितुं। सन्थागारसालं पन चतूहि इरियापथेहि परिभुञ्जितुकामो अहोसि। तत्थ पादधोवनट्ठानतो याव धम्मासना अगमासि, एत्तके ठाने गमनं निप्फन्नं। धम्मासनं पत्तं थोकं ठत्वा निसीदि, एत्तके ठाने ठानं निप्फन्नं। द्वेयामं धम्मासने निसीदि, एत्तके ठाने निसज्जा निप्फन्ना। इदानि दक्खिणेन पस्सेन थोकं निपन्ने सयनं निप्फज्जिस्सतीति एवं चतूहि इरियापथेहि परिभुञ्जितुकामो अहोसि। उपादिन्नकसरीरञ्च नाम ''नो

आगिलायती''ति न वत्तब्बं, तस्मा चिरनिसज्जाय सञ्जातं अप्पकम्पि आगिलायनं गहेत्वा एवमाह।

सङ्घाटिं पञ्ञापेत्वाति सन्थागारस्स किर एकपस्से ते राजानो पटसाणिं परिक्खिपापेत्वा कप्पियमञ्चकं पञ्ञापेत्वा कप्पियपच्चत्थरणेन अत्थरित्वा उपरि सुवण्णतारकगन्धमालादिदामपटिमण्डितं वितानं बन्धित्वा गन्धतेलप्पदीपं आरोपयिंसु, ''अप्पेव नाम सत्था धम्मासनतो वुट्ठाय थोकं विस्समन्तो इध निपज्जेय्य, एवं नो इमं सन्थागारं भगवता चतूहि इरियापथेहि परिभुत्तं दीघरत्तं हिताय सुखाय भविस्सती''ति। सत्थापि तदेव सन्धाय तत्थ सङ्घाटिं पञ्ञापेत्वा निपज्जि। **उट्ठानसञ्ञं मनसि करित्वा**ति ''एत्तकं कालं अतिक्कमित्वा वुट्ठहिस्सामी''ति वुट्ठानसञ्ञं चित्ते ठपेत्वा, तञ्च खो अनिद्दायन्तोव थेरस्स धम्मकथं सुणमानो।

अवस्सुतपरियायन्ति अवस्सुतस्स परियायं, अवस्सुतस्स कारणन्ति अत्थो। **अधिमुच्चती**ति किलेसाधिमुच्चनेन अधिमुच्चति, गिद्धो होति। **ब्यापज्जती**ति ब्यापादवसेन पूतिचित्तो होति। **चक्खुतो**ति चक्खुभावेन। **मारो**ति किलेसमारोपि देवपुत्तमारोपि। **ओतार**न्ति विवरं। **आरम्मण**न्ति पच्चयं। नळागारतिणागारं विय हि सविसेवनानि आयतनानि, तिणुक्का विय किलेसुप्पत्तिरहं आरम्मणं, तिणुक्काय ठपितठपितट्ठाने अङ्गारस्सुज्जलनं विय आरम्मणे आपाथमागते किलेसानं उप्पत्ति। तेन वुत्तं **लभेथ मारो ओतार**न्ति।

सुक्कपक्खे बहलमत्तिकपिण्डावलेपनं कूटागारं विय निब्बिसेवनानि आयतनानि, तिणुक्का विय वुत्तपकारारम्मणं, तिणुक्काय ठपितठपितट्ठाने निब्बापनं विय निब्बिसेवनानं आयतनानं आरम्मणे आपाथमागते किलेसपरिळाहस्स अनुप्पत्ति। तेन वुत्तं **नेव लभेथ मारो ओतार**न्ति।

७. दुक्खधम्मसुत्तवण्णना

२४४. सत्तमे **दुक्खधम्मान**न्ति दुक्खसम्भवधम्मानं। पञ्चसु हि खन्धेसु सति छेदनवधबन्धनादिभेदं दुक्खं सम्भवति, तस्मा ते दुक्खसम्भवधम्मत्ता दुक्खधम्माति वुच्चन्ति। **तथा खो पनस्सा**ति तेनाकारेनस्स। **यथास्स कामे पस्सतो**ति येनाकारेनस्स कामे पस्सन्तस्स। **यथा चरन्त**न्ति येनाकारेन चारञ्च विहारञ्च अनुबन्धित्वा चरन्तं। **अङ्गारकासूपमा कामा दिट्ठा होन्ती**ति परियेट्ठिमूलकस्स चेव पटिसन्धिमूलकस्स च दुक्खस्स वसेन अङ्गारकासु विय महापरिळाहाति दिट्ठा होन्ति। कामे परियेसन्तानञ्हि नावाय महासमुद्दोगाहनअजपथसङ्कुपथपटिपज्जनउभतोब्यूळ्हसङ्गामपक्खन्दनादिवसेन परियेट्ठिमूलकम्पि, कामे परिभुञ्जन्तानं कामपरिभोगचेतनाय चतूसु अपायेसु दिन्नपटिसन्धिमूलकम्पि महापरिळाहदुक्खं उप्पज्जति। एवमेतस्स दुविधस्सापि दुक्खस्स वसेन अङ्गारकासु विय महापरिळाहाति दिट्ठा होन्ति।

दायन्ति अटविं। **पुरतोपि कण्टको**ति पुरिमपस्से विज्झितुकामो विय आसन्नट्ठानेयेव ठितकण्टको। **पच्छतो**तिआदीसुपि एसेव नयो। हेट्ठा पन पादेहि अक्कन्तट्ठानस्स सन्तिके, न अक्कन्तट्ठानेयेव। एवं सो कण्टकगब्भं पविट्ठो विय भवेय्य। **मा मं कण्टको**ति मा मं कण्टको विज्झीति कण्टकवेधं रक्खमानो।

दन्धो, भिक्खवे, सतुप्पादोति सतिया उप्पादोयेव दन्धो, उप्पन्नमत्ताय पन ताय काचि किलेसा निग्गहिताव होन्ति, न सण्ठातुं सक्कोन्ति। चक्खुद्वारस्मिञ्हि रागादीसु उप्पन्नेसु दुतियजवनवारेन ''किलेसा मे उप्पन्ना''ति ञत्वा ततिये जवनवारे संवरजवनंयेव जवति। अनच्छरियञ्चेतं, यं विपस्सको ततियजवनवारे किलेसे निग्गण्हेय्य। चक्खुद्वारे पन इट्ठारम्मणे आपाथगते भवङ्गं आवट्टेत्वा आवज्जनादीसु उप्पन्नेसु वोट्ठब्बनानन्तरं सम्पत्तकिलेसजवनवारं निवत्तेत्वा

कुसलमेव उप्पादेति। आरद्धविपस्सकानञ्हि अयमानिसंसो भावनापटिसङ्खाने पतिट्ठितभावस्स।

अभिहट्ठुं पवारेय्युन्ति सुदिन्नत्थेरस्स विय रट्ठपालकुलपुत्तस्स विय च कायेन वा सत्त रतनानि अभिहरित्वा वाचाय वा ''अम्हाकं धनतो यत्तकं इच्छसि, तत्तकं गण्हा''ति वदन्ता पवारेय्युं। **अनुदहन्ती**ति सरीरे पलिवेठितत्ता उण्हपरिळाहं जनेत्वा अनुदहन्ति। सञ्जातसेदे वा सरीरे लग्गन्ता अनुसेन्तीतिपि अत्थो। **यञ्हि तं, भिक्खवे, चित्त**न्ति इदं यस्मा चित्ते अनावट्टन्ते पुग्गलस्स आवट्टनं नाम नत्थि। एवरूपञ्हि चित्तं अनावट्टन्ति, तस्मा वुत्तं। इति इमस्मिं सुत्ते विपस्सनाबलमेव दीपितं।

८. किंसुकोपमसुत्तवण्णना

२४५. अट्ठमे **दस्सन**न्ति पठममग्गस्सेतं अधिवचनं। पठममग्गो हि किलेसपहानकिच्चं साधेन्तो पठमं निब्बानं पस्सति, तस्मा दस्सनन्ति वुच्चति। गोत्रभुञाणं पन किञ्चापि मग्गतो पठमतरं पस्सति, पस्सित्वा पन कत्तब्बकिच्चस्स किलेसपहानस्स अभावेन न दस्सनन्ति वुच्चति। अपिच चत्तारोपि मग्गा दस्सनमेव। कस्मा? सोतापत्तिमग्गक्खणे दस्सनं विसुज्झति, फलक्खणे विसुद्धं। सकदागामिअनागामिअरहत्तमग्गक्खणे विसुज्झति, फलक्खणे विसुद्धन्ति एवं कथेन्तानं भिक्खूनं सुत्वा सो भिक्खु ''अहम्पि दस्सनं विसोधेत्वा अरहत्तफले पतिट्ठितो दस्सनविसुद्धिकं निब्बानं सच्छिकत्वा विहरिस्सामी''ति तं भिक्खुं उपसङ्कमित्वा एवं पुच्छि। सो फस्सायतनकम्मट्ठानिको छन्नं फस्सायतनानं वसेन रूपारूपधम्मे परिग्गहेत्वा अरहत्तं पत्तो। एत्थ हि पुरिमानि पञ्च आयतनानि रूपं, मनायतनं अरूपं। इति सो अत्तना अधिगतमग्गमेव कथेसि।

असन्तुट्ठोति पदेससङ्खारेसु ठत्वा कथितत्ता असन्तुट्ठो। एवं किरस्स अहोसि – ''अयं पदेससङ्खारेसु ठत्वा कथेसि। सक्का नु खो पदेससङ्खारेसु ठत्वा दस्सनविसुद्धिकं निब्बानं पापुणितु''न्ति? ततो नं पुच्छि – ''आवुसो, त्वंयेव नु खो इदं दस्सनविसुद्धिकं निब्बानं जानासि, उदाहु अञ्ञेपि जानन्ता अत्थी''ति। अत्थावुसो, असुकविहारे असुकत्थेरो नामाति। सो तम्पि उपसङ्कमित्वा पुच्छि। एतेनुपायेन अञ्ञम्पि अञ्ञम्पीति।

एत्थ च दुतियो पञ्चक्खन्धकम्मट्ठानिको रूपक्खन्धवसेन रूपं, सेसक्खन्धवसेन नामन्ति नामरूपं ववत्थपेत्वा अनुक्कमेन अरहत्तं पत्तो। तस्मा सोपि अत्तना अधिगतमग्गमेव कथेसि। अयं पन ''इमेसं अञ्ञमञ्ञं न समेति, पठमेन सप्पदेससङ्खारेसु ठत्वाव कथितं, इमिना निप्पदेसेसू''ति असन्तुट्ठो हुत्वा तथेव तं पुच्छित्वा पक्कामि।

ततियो महाभूतकम्मट्ठानिको चत्तारि महाभूतानि सङ्खेपतो च वित्थारतो च परिग्गहेत्वा अरहत्तं पत्तो, तस्मा अयम्पि अत्तना अधिगतमग्गमेव कथेसि। अयं पन ''इमेसं अञ्ञमञ्ञं न समेति, पठमेन सप्पदेससङ्खारेसु ठत्वा कथितं, दुतियेन निप्पदेसेसु, ततियेन अतिसप्पदेसेसू''ति असन्तुट्ठो हुत्वा तथेव तं पुच्छित्वा पक्कामि।

चतुत्थो तेभूमककम्मट्ठानिको। तस्स किर समप्पवत्ता धातुयो अहेसुं, कल्लसरीरं बलपत्तं, कम्मट्ठानानिपिस्स सब्बानेव सप्पायानि, अतीता वा सङ्खारा होन्तु अनागता वा पच्चुप्पन्ना वा कामावचरा वा रूपावचरा वा अरूपावचरा वा, सब्बेपि सप्पायाव। असप्पायकम्मट्ठानं नाम नत्थि। कालेसुपि पुरेभत्तं वा होतु पच्छाभत्तं वा पठमयामादयो वा, असप्पायो कालो नाम नत्थि। यथा नाम चारिभूमिं ओतिण्णो महाहत्थी हत्थेन गहेतब्बं हत्थेनेव लुञ्चित्वा गण्हाति, पादेहि पहरित्वा गहेतब्बं पादेहि पहरित्वा गण्हाति, एवमेव सकले तेभूमकधम्मे कलापग्गाहेन गहेत्वा सम्मसन्तो अरहत्तं पत्तो, तस्मा

एसोपि अत्तना अधिगतमग्गमेव कथेसि। अयं पन ''इमेसं अञ्ञमञ्ञं न समेति। पठमेन सप्पदेससङ्खारेसु ठत्वा कथितं, दुतियेन निप्पदेसेसु, पुन ततियेन सप्पदेसेसु, चतुत्थेन निप्पदेसेसुयेवा''ति असन्तुट्ठो हुत्वा तं पुच्छि – ''किं नु खो, आवुसो, इदं दस्सनविसुद्धिकं निब्बानं तुम्हेहि अत्तनोव धम्मताय ञातं, उदाहु केनचि वो अक्खात''न्ति? आवुसो, मयं किं जानाम? अत्थि पन सदेवके लोके सम्मासम्बुद्धो, तं निस्सायेतं अम्हेहि ञातन्ति। सो चिन्तेसि – ''इमे भिक्खू मय्हं अज्झासयं गहेत्वा कथेतुं न सक्कोन्ति, अहं सब्बञ्ञुबुद्धमेव पुच्छित्वा निक्कङ्खो भविस्सामी''ति येन भगवा तेनुपसङ्कमि।

भगवा तस्स वचनं सुत्वा ''येहि ते पञ्हो कथितो, ते चत्तारोपि खीणासवा, सुकथितं तेहि, त्वं पन अत्तनो अन्धबालताय तं न सल्लक्खेसी''ति न एवं विहेसेसि। कारकभावं पनस्स ञत्वा ''अत्थगवेसको एस, धम्मदेसनाय एव नं बुज्झापेस्सामी''ति किंसुकोपमं आहरि। तत्थ भूतं वत्थुं कत्वा एवमत्थो विभावेतब्बो – एकस्मिं किर महानगरे एको सब्बगन्थधरो ब्राह्मणवेज्जो पण्डितो पटिवसति। अथेको नगरस्स पाचीनद्वारगामवासी पण्डुरोगपुरिसो तस्स सन्तिकं आगन्त्वा तं वन्दित्वा अट्ठासि। वेज्जपण्डितो तेन सद्धिं सम्मोदित्वा ''केनत्थेन आगतोसि भद्रमुखा''ति, पुच्छि। रोगेनम्हि, अय्य, उपद्दुतो, भेसज्जं मे कथेहीति। तेन हि, भो, गच्छ, किंसुकरुक्खं छिन्दित्वा, सोसेत्वा झापेत्वा, तस्स खारोदकं गहेत्वा इमिना चिमिना च भेसज्जेन योजेत्वा, अरिट्ठं कत्वा पिव, तेन ते फासुकं भविस्सतीति। सो तथा कत्वा निरोगो बलवा पासादिको जातो।

अथञ्ञो दक्खिणद्वारगामवासी पुरिसो तेनेव रोगेन आतुरो ''असुको किर भेसज्जं कत्वा अरोगो जातो''ति सुत्वा तं उपसङ्कमित्वा पुच्छि – ''केन ते, सम्म, फासुकं जात''न्ति। किंसुकारिट्ठेन नाम, गच्छ त्वम्पि करोहीति। सोपि तथा कत्वा तादिसोव जातो।

अथञ्ञो पच्छिमद्वारगामवासी...पे॰... उत्तरद्वारगामवासी पुरिसो तेनेव रोगेन आतुरो ''असुको किर भेसज्जं कत्वा अरोगो जातो''ति तं उपसङ्कमित्वा पुच्छि ''केन ते, सम्म, फासुकं जात''न्ति? किंसुकारिट्ठेन नाम, गच्छ त्वम्पि करोहीति। सोपि तथा कत्वा तादिसोव जातो।

अथञ्ञो पच्चन्तवासी अदिट्ठपुब्बकिंसुको एको पुरिसो तेनेव रोगेन आतुरो चिरं तानि तानि भेसज्जानि कत्वा रोगे अवूपसममाने ''असुको किर नगरस्स पाचीनद्वारगामवासी पुरिसो भेसज्जं कत्वा अरोगो जातो''ति सुत्वा ''गच्छामहम्पि, तेन कतभेसज्जं करिस्सामी''ति दण्डमोलुब्भ अनुपुब्बेन तस्स सन्तिकं गन्त्वा, ''केन ते, सम्म, फासुकं जात''न्ति पुच्छि। किंसुकारिट्ठेन सम्माति। कीदिसो पन सो किंसुकोति। झापितगामे ठितझामथूणो वियाति। इति सो पुरिसो अत्तना दिट्ठाकारेनव किंसुकं आचिक्खि। तेन हि दिट्ठकाले किंसुको पतितपत्तो खाणुककाले दिट्ठत्ता तादिसोव होति।

सो पन पुरिसो सुतमङ्गलिकत्ता ''अयं 'झापितगामे झामथूणो विया'ति आह, अमङ्गलमेतं। एतस्मिञ्हि मे भेसज्जे कतेपि रोगो न वूपसमिस्सती''ति तस्स वेय्याकरणेन असन्तुट्ठो तं पुच्छि – ''किं नु खो, भो, त्वञ्ञेव किंसुकं जानासि, उदाहु अञ्ञोपि अत्थी''ति। अत्थि, भो, दक्खिणद्वारगामे असुको नामाति। सो तं उपसङ्कमित्वा पुच्छि, स्वास्स पुप्फितकाले दिट्ठत्ता अत्तनो दस्सनानुरूपेन ''लोहितको किंसुको''ति आह। सो ''अयं पुरिमेन विरुद्धं आह, काळको लोहितकतो सुविदूरदूरे''ति तस्सपि वेय्याकरणेन असन्तुट्ठो ''अत्थि पन, भो, अञ्ञोपि कोचि किंसुकदस्सावी, येन किंसुको दिट्ठपुब्बो''ति? पुच्छित्वा, ''अत्थि पच्छिमद्वारगामे असुको नामा''ति वुत्ते तम्पि उपसङ्कमित्वा पुच्छि। स्वास्स फलितकाले दिट्ठत्ता अत्तनो दस्सनानुरूपेन ''ओचिरकजातो आदिन्नसिपाटिको''ति आह। फलितकालस्मिञ्हि किंसुको ओलम्बमानचीरको विय अधोमुखं कत्वा गहितअसिकोसो विय च सिरीसरुक्खो विय च लम्बमानफलो होति। सो ''अयं

पुरिमेहि विरुद्धं आह, न सक्का इमस्स वचनं गहेतु''न्ति तस्सपि वेय्याकरणेन असन्तुट्ठो ''अत्थि पन, भो, अञ्ञोपि कोचि किंसुकदस्सावी, येन किंसुको दिट्ठपुब्बो''ति? पुच्छित्वा, ''अत्थि उत्तरद्वारगामे असुको नामा''ति वुत्ते तम्पि उपसङ्कमित्वा पुच्छि। सो अस्स सञ्छन्नपत्तकाले दिट्ठत्ता अत्तनो दस्सनानुरूपेन ''बहलपत्तपलासो सन्दच्छायो''ति आह। **सन्दच्छायो** नाम संसन्दित्वा ठितच्छायो।

सो ''अयम्पि पुरिमेहि विरुद्धं आह, न सक्का इमस्स वचनं गहेतु''न्ति तस्सपि वेय्याकरणेन असन्तुट्ठो तं आह, ''किं नु खो, भो, तुम्हे अत्तनोव धम्मताय किंसुकं जानाथ, उदाहु केनचि वो अक्खातो''ति? किं, भो, मयं जानाम? अत्थि पन महानगरस्स मज्झे अम्हाकं आचरियो वेज्जपण्डितो, तं निस्साय अम्हेहि ञातन्ति। ''तेन हि अहम्पि आचरियमेव उपसङ्कमित्वा निक्कङ्खो भविस्सामी''ति तस्स सन्तिकं उपसङ्कमित्वा तं वन्दित्वा अट्ठासि। वेज्जपण्डितो तेन सद्धिं सम्मोदित्वा, ''केनत्थेन आगतोसि भद्रमुखा''ति पुच्छि। रोगेनम्हि, अय्य, उपद्दुतो, भेसज्जं मे कथेथाति। तेन हि, भो, गच्छ, किंसुकरुक्खं छिन्दित्वा सोसेत्वा झापेत्वा तस्स खारोदकं गहेत्वा इमिना चिमिना च भेसज्जेन योजेत्वा अरिट्ठं कत्वा पिव, एतेन ते फासुकं भविस्सतीति। सो तथा कत्वा निरोगो बलवा पासादिको जातो।

तत्थ महानगरं विय निब्बाननगरं दट्ठब्बं। वेज्जपण्डितो विय सम्मासम्बुद्धो। वुत्तम्पि चे तं ''भिसक्को सल्लकत्तोति खो, सुनक्खत्त, तथागतस्सेतं अधिवचनं अरहतो सम्मासम्बुद्धस्सा''ति (म॰ नि॰ ३.६५) चतूसु द्वारगामेसु चत्तारो वेज्जन्तेवासिका विय चत्तारो दस्सनविसुद्धिपत्ता खीणासवा। पच्चन्तवासी पठमपुरिसो विय पञ्हपुच्छको भिक्खु। पच्चन्तवासिनो चतुन्नं वेज्जन्तेवासिकानं कथाय असन्तुट्ठस्स आचरियमेव उपसङ्कमित्वा पुच्छनकालो विय इमस्स भिक्खुनो चतुन्नं दस्सनविसुद्धिपत्तानं खीणासवानं कथाय असन्तुट्ठस्स सत्थारं उपसङ्कमित्वा पुच्छनकालो।

यथा यथा अधिमुत्तानन्ति येन येनाकारेन अधिमुत्तानं। **दस्सनं सुविसुद्ध**न्ति निब्बानदस्सनं सुट्ठु विसुद्धं। **तथा तथा खो तेहि सप्पुरिसेहि ब्याकत**न्ति तेन तेनेवाकारेन तुय्हं तेहि सप्पुरिसेहि कथितं। यथा हि ''काळको किंसुको''ति कथेन्तो न अञ्ञं कथेसि, अत्तना दिट्ठनयेन किंसुकमेव कथेसि, एवमेव छफस्सायतनानं वसेन दस्सनविसुद्धिपत्तखीणासवोपि इमं पञ्हं कथेन्तो न अञ्ञं कथेसि, अत्तना अधिगतमग्गेन दस्सनविसुद्धिकं निब्बानमेव कथेसि।

यथा च ''लोहितको ओचिरकजातो बहलपत्तपलासो किंसुको''ति कथेन्तोपि न अञ्ञं कथेसि, अत्तना दिट्ठनयेन किंसुकमेव कथेसि, एवमेव पञ्चुपादानक्खन्धवसेन चतुमहाभूतवसेन तेभूमकधम्मवसेन दस्सनविसुद्धिपत्तखीणासवोपि इमं पञ्हं कथेन्तो न अञ्ञं कथेसि, अत्तना अधिगतमग्गेन दस्सनविसुद्धिकं निब्बानमेव कथेसि।

तत्थ यथा काळककाले किंसुकदस्साविनोपि तं दस्सनं भूतं तच्छं न तेन अञ्ञं दिट्ठं, किंसुकोव दिट्ठो, एवमेव छफस्सायतनवसेन दस्सनविसुद्धिपत्तस्सापि खीणासवस्स दस्सनं भूतं तच्छं, न तेन अञ्ञं कथितं, अत्तना अधिगतमग्गेन दस्सनविसुद्धिकं निब्बानमेव कथितं। यथा च लोहितकाले ओचिरकजातकाले बहलपत्तपलासकाले किंसुकदस्साविनोपि तं दस्सनं भूतं तच्छं, न तेन अञ्ञं दिट्ठं, किंसुकोव दिट्ठो, एवमेव पञ्चुपादानक्खन्धवसेन चतुमहाभूतवसेन तेभूमकधम्मवसेन दस्सनविसुद्धिपत्तस्सापि खीणासवस्स दस्सनं भूतं तच्छं, न तेन अञ्ञं कथितं, अत्तना अधिगतमग्गेन दस्सनविसुद्धिकं निब्बानमेव कथितं।

सेय्यथापि, **भिक्खु रञ्ञो पच्चन्तिमं नगर**न्ति इदं कस्मा आरद्धं? सचे तेन भिक्खुना तं सल्लक्खितं, अथस्स

धम्मदेसनत्थं आरद्धं। सचे न सल्लक्खितं, अथस्स इमिना नगरोपमेन तस्सेवत्थस्स दीपनत्थाय आविभावनत्थाय आरद्धं। तत्थ यस्मा मज्झिमपदेसे नगरस्स पाकारादीनि थिरानि वा होन्तु दुब्बलानि वा, सब्बसो वा मा होन्तु, चोरासङ्का न होन्ति, तस्मा तं अग्गहेत्वा ''पच्चन्तिमं नगर''न्ति आह। **दळ्हुद्धापन्**ति थिरपाकारं। **दळ्हपाकारतोरण**न्ति थिरपाकारञ्चेव थिरतोरणञ्च। तोरणानि नाम हि पुरिसुब्बेधानि नगरस्स अलङ्कारत्थं करीयन्ति, चोरनिवारणत्थानिपि होन्तियेव। अथ वा तोरणन्ति पिट्ठसङ्घाटस्सेतं नामं, थिरपिट्ठसङ्घाटन्तिपि अत्थो। **छद्वार**न्ति नगरद्वारं नाम एकम्पि होति द्वेपि सतम्पि सहस्सम्पि, इध पन सत्था छद्वारिकनगरं दस्सेन्तो एवमाह। **पण्डितो**ति पण्डिच्चेन समन्नागतो। **ब्यत्तो**ति वेय्यत्तियेन समन्नागतो विसदञाणो। **मेधावी**ति ठानुप्पत्तिकपञ्ञासङ्खाताय मेधाय समन्नागतो।

पुरत्थिमाय दिसायातिआदिम्हि भूतमत्थं कत्वा एवमत्थो वेदितब्बो – समिद्धे किर महानगरे सत्तरतनसम्पन्नो राजा चक्कवत्ति रज्जं अनुसासति, तस्सेतं पच्चन्तनगरं राजायुत्तविरहितं, अथ पुरिसा आगन्त्वा ''अम्हाकं, देव, नगरे आयुत्तको नत्थि, देहि नो किञ्चि आयुत्तक''न्ति आहंसु। राजा एकं पुत्तं दत्वा ''गच्छथ, एतं आदाय तत्थ अभिसिञ्चित्वा विनिच्छयट्ठानादीनि कत्वा वसथा''ति। ते तथा अकंसु। राजपुत्तो पापमित्तसंसग्गेन कतिपाहेयेव सुरासोण्डो हुत्वा, सब्बानि विनिच्छयट्ठानादीनि हारेत्वा, नगरमज्झे धुत्तेहि परिवारितो सुरं पिवन्तो नच्चगीतादिरतिया वीतिनामेति। अथ रञ्ञो आगन्त्वा आरोचयिंसु।

राजा एकं पण्डितं अमच्चं आणापेसि – ''गच्छ कुमारं ओवदित्वा, विनिच्छयट्ठानादीनि कारेत्वा, पुन अभिसेकं कत्वा, एही''ति। न सक्का, देव, कुमारं ओवदितुं, चण्डो कुमारो घातेय्यापि मन्ति। अथेकं बलसम्पन्नं योधं आणापेसि – ''त्वं इमिना सद्धिं गन्त्वा सचे सो ओवादे न तिट्ठति, सीसमस्स छिन्दाही''ति। इति सो अमच्चो योधो चाति इदं सीघं दूतयुगं तत्थ गन्त्वा दोवारिकं पुच्छि – ''कहं, भो, नगरस्स सामि कुमारो''ति। एस मज्झेसिङ्घाटके सुरं पिवन्तो धुत्तपरिवारितो गीतादिरतिं अनुभोन्तो निसिन्नोति। अथ तं दूतयुगं गन्त्वा अमच्चो तावेत्थ, ''सामि, विनिच्छयट्ठानादीनि किर कारेत्वा साधुकं रज्जं अनुसासा''ति आह। कुमारो असुणन्तो विय निसीदि। अथ नं योधो सीसे गहेत्वा, ''सचे रञ्ञो आणं करोसि, कर, नो चे, एत्थेव ते सीसं पातेस्सामी''ति खग्गं अब्बाहि। परिचारका धुत्ता तावदेव दिसासु पलायिंसु। कुमारो भीतो सासनं सम्पटिच्छि। अथस्स ते तत्थेव अभिसेकं कत्वा सेतच्छत्तं उस्सापेत्वा ''सम्मा रज्जं अनुसासाही''ति रञ्ञा वुत्तं यथाभूतवचनं निय्यातेत्वा यथागतमग्गमेव पटिपज्जिंसु। इममत्थं आविकरोन्तो भगवा ''पुरत्थिमाय दिसाया''ति आह।

तत्रिदं ओपम्मसंसन्दनं – समिद्धमहानगरं विय हि निब्बाननगरं दट्ठब्बं, सत्तरतनसमन्नागतो राजा चक्कवत्ति विय सत्तबोज्झङ्गरतनसमन्नागतो धम्मराजा सम्मासम्बुद्धो, पच्चन्तिमनगरं विय सक्कायनगरं, तस्मिं नगरे कूटराजपुत्तो विय इमस्स भिक्खुनो कूटचित्तुप्पादो, कूटराजपुत्तस्स धुत्तेहि परिवारितकालो विय इमस्स भिक्खुनो पञ्चहि नीवरणेहि समङ्गिकालो, द्वे सीघदूता विय समथकम्मट्ठानञ्च विपस्सनाकम्मट्ठानञ्च, महायोधेन सीसे गहितकालो विय उप्पन्नपठमज्झानसमाधिना निच्चलं कत्वा चित्तग्गहितकालो, योधेन सीसे गहितमत्ते धुत्तानं दिसासु पलायित्वा दूरीभावो विय पठमज्झानम्हि उप्पन्नमत्ते नीवरणानं दूरीभावो, ''करिस्सामि रञ्ञो सासन''न्ति सम्पटिच्छितमत्ते विस्सट्ठकालो विय झानतो वुट्ठितकालो, अमच्चेन रञ्ञो सासनं आरोचितकालो विय समाधिना चित्तं कम्मनियं कत्वा विपस्सनाकम्मट्ठानस्स वड्ढितकालो, तत्थेवस्स तेहि द्वीहि दूतेहि कताभिसेकस्स सेतच्छत्तउस्सापनं विय समथविपस्सनाकम्मट्ठानं निस्साय अरहत्तप्पत्तस्स विमुत्तिसेतच्छत्तुस्सापनं वेदितब्बं।

नगरन्ति खो भिक्खु इमस्सेतं चातुमहाभूतिकस्स कायस्स अधिवचनन्तिआदीसु पन

चातुमहाभूतिकस्सातिआदीनं पदानं अत्थो हेट्ठा वित्थारितोव। केवलं पन विञ्ञाणराजपुत्तस्स निवासट्ठानत्ता एत्थ कायो ''नगर''न्ति वुत्तो, तस्सेव द्वारभूतत्ता छ आयतनानि ''द्वारानी''ति, तेसु द्वारेसु निच्चं सुप्पतिट्ठितत्ता सति ''दोवारिको''ति, कम्मट्ठानं आचिक्खन्तेन धम्मराजेन पेसितत्ता समथविपस्सना ''सीघं दूतयुग''न्ति। एत्थ महायोधो विय समथो, पण्डितामच्चो विय विपस्सना वेदितब्बा।

मज्झे सिङ्घाटकोति नगरमज्झे सिङ्घाटको। **महाभूतान**न्ति हदयवत्थुस्स निस्सयभूतानं महाभूतानं। वत्थुरूपस्स हि पच्चयदस्सनत्थमेवेतं चतुमहाभूतग्गहणं कतं। नगरमज्झे पन सो राजकुमारो विय सरीरमज्झे हदयरूपसिङ्घाटके निसिन्नो समथविपस्सनादूतेहि अरहत्ताभिसेकेन अभिसिञ्चितब्बो विपस्सनाविञ्ञाणराजपुत्तो दट्ठब्बो। निब्बानं पन यथाभूतसभावं अकुप्पं अधिकारीति कत्वा **यथाभूतं वचन**न्ति वुत्तं। अरियमग्गो पन यादिसोव पुब्बभागविपस्सनामग्गो, अयम्पि अट्ठङ्गसमन्नागतत्ता तादिसोयेवाति कत्वा **यथागतमग्गो**ति वुत्तो। इदं तावेत्थ धम्मदेसनत्थं आभताय उपमाय संसन्दनं।

तस्सेवत्थस्स पाकटीकरणत्थं आभतपक्खे पन इदं संसन्दनं – एत्थ हि छद्वारूपमा छफस्सायतनवसेन दस्सनविसुद्धिपत्तं खीणासवं दस्सेतुं आभता, नगरसामिउपमा पञ्चक्खन्धवसेन, सिङ्घाटकूपमा चतुमहाभूतवसेन, नगरूपमा तेभूमकधम्मवसेन दस्सनविसुद्धिपत्तं खीणासवं दस्सेतुं आभता। सङ्खेपतो पनिमस्मिं सुत्ते चतुसच्चमेव कथितं। सकलेनपि हि नगरसम्भारेन दुक्खसच्चमेव कथितं, यथाभूतवचनेन निरोधसच्चं, यथागतमग्गेन मग्गसच्चं, दुक्खस्स पन पभाविका तण्हा समुदयसच्चं। देसनापरियोसाने पञ्हपुच्छको भिक्खु सोतापत्तिफले पतिट्ठितोति।

९. वीणोपमसुत्तवण्णना

२४६. नवमे **यस्स कस्सचि, भिक्खवे, भिक्खुस्स वा भिक्खुनिया वा**ति इदं सत्था यथा नाम महाकुटुम्बिको महन्तं कसिकम्मं कत्वा, निप्फन्नसस्सो घरद्वारे मण्डपं कत्वा, उभतोसङ्घस्स दानं पवत्तेय्य। किञ्चापि तेन उभतोसङ्घस्स दानं पट्ठपितं, द्वीसु पन परिसासु सन्तप्पितासु सेसजनम्पि सन्तप्पेतियेव, एवमेव भगवा समधिकानि चत्तारि असङ्ख्येय्यानि पारमियो पूरेत्वा बोधिमण्डे सब्बञ्ञुतञ्ञाणं अधिगन्त्वा पवत्तितवरधम्मचक्को जेतवनमहाविहारे निसिन्नो भिक्खुपरिसाय चेव भिक्खुनिपरिसाय च महाधम्मयागं यजन्तो वीणोपमसुत्तं आरभि। तं पेनेतं किञ्चापि द्वे परिसा सन्धाय आरद्धं, चतुन्नम्पि पन परिसानं अवारितं। तस्मा सब्बेहिपि सोतब्बञ्चेव सद्धातब्बञ्च, परियोगाहित्वा चस्स अत्थरसो विन्दितब्बोति।

तत्थ **छन्दो**तिआदीसु **छन्दो** नाम पुब्बुप्पत्तिका दुब्बलतण्हा, सो रञ्जेतुं न सक्कोति। अपरापरं उप्पज्जमाना पन बलवतण्हा **रागो** नाम, सो रञ्जेतुं सक्कोति। दण्डादानादीनि कातुं असमत्थो पुब्बुप्पत्तिको दुब्बलकोधो **दोसो** नाम। तानि कातुं समत्थो अपरापरुप्पत्तिको बलवकोधो **पटिघं** नाम। **मोहो** पन मोहनसम्मोहनवसेन उप्पन्नं अञ्ञाणं। एवमेत्थ पञ्चहिपि पदेहि तीणि अकुसलमूलानि गहितानि। तेसु गहितेसु सब्बेपि तम्मूलका किलेसा गहिताव होन्ति। ''छन्दो रागो''ति वा पदद्वयेन अट्ठलोभसहगतचित्तुप्पादा, ''दोसो पटिघ''न्ति पदद्वयेन द्वे दोमनस्ससहगतचित्तुप्पादा, मोहपदेन लोभदोसरहिता द्वे उद्धच्चविचिकिच्छासहगतचित्तुप्पादा गहिताति। एवं सब्बेपि द्वादस चित्तुप्पादा दस्सिताव होन्ति।

सभयोति किलेसचोरानं निवासट्ठानत्ता सभयो। **सप्पटिभयो**ति वधबन्धनादीनं कारणत्ता सप्पटिभयो। **सकण्टको**ति रागादीहि कण्टकेहि सकण्टको। **सगहनो**ति रागगहनादीहि सगहनो। **उम्मग्गो**ति देवलोकं वा मनुस्सलोकं वा निब्बानं वा गच्छन्तस्स अमग्गो। **कुम्मग्गो**ति कुच्छितजेगुच्छिभूतट्ठानगमनएकपदिकमग्गो विय अपायसम्पापकत्ता कुम्मग्गो।

दुहितिकोति एत्थ इहितीति इरियना, दुक्खा इहिति एत्थाति, **दुहितिको**। यस्मिञ्हि मग्गे मूलफलादिखादनीयं वा सायनीयं वा नत्थि, तस्मिं इरियना दुक्खा होति, न सक्का तं पटिपज्जित्वा इच्छितट्ठानं गन्तुं। किलेसमग्गम्पि पटिपज्जित्वा न सक्का सम्पत्तिभवं गन्तुन्ति किलेसमग्गो दुहितिकोति वुत्तो। द्वीहितिकोतिपि पाठो, एसेवत्थो। **असप्पुरिससेवितो**ति कोकालिकादीहि असप्पुरिसेहि सेवितो।

ततो चित्तं निवारयेति तेहि चक्खुविञ्ञेय्येहि रूपेहि तं छन्दादिवसेन पवत्तचित्तं असुभावज्जनादीहि उपायेहि निवारये। चक्खुद्वारस्मिञ्हि इट्ठारम्मणे रागे उप्पन्ने असुभतो आवज्जन्तस्स चित्तं निवत्तति, अनिट्ठारम्मणे दोसे उप्पन्ने मेत्ततो आवज्जन्तस्स चित्तं निवत्तति, मज्झत्तारम्मणे मोहे उप्पन्ने उद्देसपरिपुच्छं गरुवासं आवज्जन्तस्स चित्तं निवत्तति। एवं असक्कोन्तेन पन सत्थुमहत्ततं धम्मस्स स्वाक्खातता सङ्घस्स सुप्पटिपत्ति च आवज्जितब्बा। सत्थुमहत्ततं पच्चवेक्खतोपि हि धम्मस्स स्वाक्खाततं सङ्घस्स सुप्पटिपत्तिं पच्चवेक्खतोपि चित्तं निवत्तति। तेन वुत्तं ''असुभावज्जनादीहि उपायेहि निवारये''ति।

किट्ठन्ति किट्ठट्ठाने उप्पन्नसस्सं। **सम्पन्न**न्ति परिपुण्णं सुनिप्फन्नं। **किट्ठादो**ति सस्सखादको। **एवमेव खो**ति एत्थ सम्पन्नकिट्ठं विय पञ्च कामगुणा दट्ठब्बा, किट्ठादो गोणो विय कूटचित्तं, किट्ठारक्खस्स पमादकालो विय भिक्खुनो छसु द्वारेसु सतिं पहाय विचरणकालो, किट्ठारक्खस्स पमादमागम्म गोणेन गहितगब्भस्स किट्ठस्स खादितत्ता सस्ससामिनो सस्सफलानधिगमो विय छद्वाररक्खिकाय सतिया विप्पवासमागम्म पञ्चकामगुणं अस्सादेन्तेन चित्तेन कुसलपक्खस्स नासितत्ता भिक्खुनो सामञ्ञफलाधिगमाभावो वेदितब्बो।

उपरिघटायन्ति द्विन्नं सिङ्गानं अन्तरे। **सुनिग्गहितं निग्गण्हेय्या**ति घटायं पतिट्ठिते नासारज्जुके सुट्ठु निग्गहितं कत्वा निग्गण्हेय्य। **दण्डेना**ति मुग्गरसदिसेन थूलदण्डकेन। **एवञ्हि सो भिक्खवे गोणो**ति एवं सो किट्ठारक्खस्स पमादमन्वाय यस्मिं यस्मिं खणे किट्ठं ओतरितुकामो होति, तस्मिं तस्मिं खणे एवं निग्गण्हित्वा ताळेत्वा ओसज्जनेन निब्बिसेवनभावं उपनीतो गोणो।

एवमेव खोति इधापि सम्पन्नकिट्ठमिव पञ्च कामगुणा दट्ठब्बा, किट्ठादो विय कूटचित्तं, किट्ठारक्खस्स अप्पमादो विय इमस्स भिक्खुनो छसु द्वारेसु सतिया अविस्सज्जनं, दण्डो विय सुत्तन्तो, गोणस्स किट्ठाभिमुखकाले दण्डेन ताळनं विय चित्तस्स बहिद्धा पुथुत्तारम्मणाभिमुखकाले अनमतग्गियदेवदूतआदित्तआसीविसूपमअनागतभयादीसु तं तं सुत्तं आवज्जेत्वा चित्तुप्पादस्स पुथुत्तारम्मणतो निवारेत्वा मूलकम्मट्ठाने ओतारणं वेदितब्बं। तेनाहु पोराणा –

''सुभासितं सुत्वा मनो पसीदति,
दमेति नं पीतिसुखञ्च विन्दति।
तदस्स आरम्मणे तिट्ठते मनो,
गोणोव किट्ठादको दण्डतज्जितो''ति॥

उदुजितन्ति तज्जितं। **सुदुजित**न्ति सुतज्जितं, सुजितन्तिपि अत्थो। उदु, सुदूति इदं पन निपातमत्तमेव। **अज्झत्त**न्ति गोचरज्झत्तं। **सन्तिट्ठती**तिआदीसु पठमज्झानवसेन सन्तिट्ठति, दुतियज्झानवसेन सन्निसीदति, ततियज्झानवसेन एकोदि होति, चतुत्थज्झानवसेन समाधियति। सब्बम्पि वा एतं पठमज्झानवसेन वेदितब्बं। एत्तावता हि सम्मासम्बुद्धेन समथानुरक्खणइन्द्रियसंवरसीलं नाम कथितं।

रञ्ञो वाति कस्सचिदेव पच्चन्तरञ्ञो वा। **सद्दं सुणेय्या**ति पच्चूसकाले पबुद्धो कुसलेन वीणावादकेन वादियमानाय मधुरसद्दं सुणेय्य। **रजनीयो**तिआदीसु चित्तं रञ्जेतीति **रजनीयो**। कामेतब्बताय **कमनीयो**। चित्तं मदयतीति **मदनीयो**। चित्तं मुच्छितं विय करणतो मुच्छियतीति **मुच्छनीयो**। आबन्धित्वा विय गहणतो बन्धतीति **बन्धनीयो। अलं मे, भो**ति वीणाय सण्ठानं दिस्वा तं अनिच्छन्तो एवमाह। **उपधारणे**ति वेट्ठके। **कोण**न्ति चतुरस्सं सारदण्डकं।

सो तं वीणन्ति सो राजा ''आहरथ नं वीणं, अहमस्सा सद्दं पसिस्सामी''ति तं वीणं गहेत्वा। **दसधा वा**तिआदीसु पठमं ताव दसधा फालेय्य, अथस्सा सद्दं अपस्सन्तो सतधा फालेय्य, तथापि अपस्सन्तो सकलिकं सकलिकं करेय्य, तथापि अपस्सन्तो ''सकलिका झायिस्सन्ति, सद्दो पन निक्खमित्वा पलायिस्सति, तदा नं पस्सिस्सामी''ति अग्गिना डहेय्य। तथापि अपस्सन्तो ''सल्लहुकानि मसिचुण्णानि वातेन भस्सिस्सन्ति, सद्दो सारधञ्ञं विय पादमूले पतिस्सति, तदा नं पस्सिस्सामी''ति महावाते वा ओफुनेय्य। तथापि अपस्सन्तो ''मसिचुण्णानि यथोदकं गमिस्सन्ति, सद्दो पन पारं गच्छन्तो पुरिसो विय निक्खमित्वा तरिस्सति, तदा नं पस्सिस्सामी''ति नदिया वा सीघसोताय पवाहेय्य।

एवं वदेय्याति सब्बेहिपिमेहि उपायेहि अपस्सन्तो ते मनुस्से एवं वदेय्य। **असती किराय**न्ति असती किर अयं वीणा, लामिकाति अत्थो। असतीति लामकाधिवचनमेतं। यथाह —

''असा लोकित्थियो नाम, वेला तासं न विज्जति।
सारत्ता च पगब्भा च, सिखी सब्बघसो यथा''ति॥ (जा० १.१.६१)।

यथेवं यंकिञ्चि वीणा नामाति न केवलञ्च वीणायेव लामिका, यथेव पन अयं वीणा नाम, एवं यंकिञ्चि अञ्ञम्पि तन्तिबद्धं, सब्बं तं लामकमेवाति अत्थो। **एवमेव खो**ति एत्थ वीणा विय पञ्चक्खन्धा दट्ठब्बा, राजा विय योगावचरो। यथा सो राजा तं वीणं दसधा फालनतो पट्ठाय विचिनन्तो सद्दं अदिस्वा वीणाय अनत्थिको होति, एवं योगावचरो पञ्चक्खन्धे सम्मसन्तो अहन्ति वा ममन्ति वा गहेतब्बं अपस्सन्तो खन्धेहि अनत्थिको होति। तेनस्स तं खन्धसम्मसनं दस्सेन्तो **रूपं समन्वेसति यावता रूपस्स गती**तिआदिमाह।

तत्थ **समन्वेसती**ति परियेसति। **यावता रूपस्स गती**ति यत्तका रूपस्स गति। तत्थ **गती**ति गतिगति, सञ्जातिगति, सलक्खणगति, विभवगति, भेदगतीति पञ्चविधा होन्ति। तत्थ इदं रूपं नाम हेट्ठा अवीचिपरियन्तं कत्वा उपरि अकनिट्ठब्रह्मलोकं अन्तो कत्वा एत्थन्तरे संसरति वत्तति, अयमस्स **गतिगति** नाम।

अयं पन कायो नेव पदुमगब्भे, न पुण्डरीकनीलुप्पलादीसु सञ्जायति, आमासयपक्कासयानं पन अन्तरे बहलन्धकारे दुग्गन्धपवनविचरिते परमजेगुच्छे ओकासे पूतिमच्छादीसु किमि विय सञ्जायति, अयं रूपस्स **सञ्जातिगति** नाम।

दुविधं पन रूपस्स लक्खणं, ''रुप्पतीति खो, भिक्खवे, तस्मा रूप''न्ति (सं० नि० ३.७९) एवं वुत्त रुप्पनसङ्खातं पच्चत्तलक्खणञ्च अनिच्चादिभेदं सामञ्ञलक्खणञ्च, अयमस्स **सलक्खणगति** नाम।

''गति मिगानं पवनं, आकासो पक्खिनं गति।
विभवो गति धम्मानं, निब्बानं अरहतो गती''ति॥ (परि० ३३९) —

एवं वुत्तो रूपस्स अभावो **विभवगति** नाम। यो पनस्स भेदो, अयं **भेदगति** नाम। वेदनादीसुपि एसेव नयो। केवलञ्हेत्थ

उपरि याव भवग्गा तेसं सञ्जातिगति, सलक्खणगतियञ्च वेदयितसञ्जाननअभिसङ्खरणविजाननवसेन पच्चत्तलक्खणं वेदितब्बं।

तम्पि तस्स न होतीति यदेतं रूपादीसु अहन्ति वा ममन्ति वा अस्मीति वा एवं निद्दिट्ठं दिट्ठितण्हामानग्गाहत्तयं, तम्पि तस्स खीणासवस्स न होतीति यथानुसन्धिनाव सुत्तागतं। तेन वुत्तं महाअट्ठकथायं –

''आदिम्हि सीलं कथितं, मज्झे समाधिभावना।
परियोसाने च निब्बानं, एसा वीणोपमा कथा''ति॥

१०. छप्पाणकोपमसुत्तवण्णना

२४७. दसमे **अरुगत्तो**ति वणसरीरो। तेसंयेव अरूनं पक्कत्ता **पक्कगत्तो। सरवन**न्ति कण्डवनं। **एवमेव खो**ति अरुगत्तो पुरिसो विय दुस्सीलपुग्गलो वेदितब्बो। तस्स कुसकण्टकेहि विद्धस्स सरपत्तेहि च असिधारूपमेहि विलिखितगत्तस्स भिय्योसोमत्ताय दुक्खदोमनस्सं विय तत्थ तत्थ सब्रह्मचारीहि ''अयं सो इमेसञ्च इमेसञ्च कम्मानं कारको''ति वुच्चमानस्स उप्पज्जनदुक्खं वेदितब्बं।

लभति वत्तारन्ति लभति चोदकं। **एवंकारी**ति एवरूपानं वेज्जकम्मदूतकम्मादीनं कारको। **एवंसमाचारो**ति विधवा गोचरादिवसेन एवरूपगोचरो। **असुचिगामकण्टको**ति असुद्धट्ठेन असुचि, गामवासीनं विज्झनट्ठेन कण्टकोति गामकण्टको।

पक्खिन्ति हत्थिसोण्डसकुणं। **ओस्सज्जेय्या**ति विस्सज्जेय्य। **आविञ्छेय्यु**न्ति आकड्ढेय्युं। **पवेक्खामी**ति पविसिस्सामि। **आकासं डेस्सामी**ति आकासं उप्पतिस्सामि।

एतेसु पन अहि ''भोगेहि मण्डलं बन्धित्वा सुपिस्सामी''ति वम्मिकं पविसितुकामो होति। सुसुमारो ''दूरे बिलं पविसित्वा निपज्जिस्सामी''ति उदकं पविसितुकामो होति। पक्खी ''अजटाकासे सुखं विचरिस्सामी''ति आकासं डेतुकामो होति। कुक्कुरो ''उद्धनट्ठाने छारिकं ब्यूहित्वा उसुमं गण्हन्तो निपज्जिस्सामी''ति गामं पविसितुकामो होति। सिङ्गालो ''मनुस्समंसं खादित्वा पिट्ठिं पसारेत्वा सयिस्सामी''ति आमकसुसानं पविसितुकामो होति। मक्कटो ''उच्चे रुक्खे अभिरुहित्वा दिसादिसं पक्खन्दिस्सामी''ति वनं पविसितुकामो होति।

अनुविधायेय्युन्ति अनुगच्छेय्युं, अनुविधियेय्युन्तिपि पाठो, अनुविधानं आपज्जेय्युन्ति अत्थो। यत्थ सो याति, तत्थेव गच्छेय्युन्ति वुत्तं होति। **एवमेवा**ति एत्थ छ पाणका विय छायतनानि दट्ठब्बानि, दळ्हरज्जु विय तण्हा, मज्झे गण्ठि विय अविज्जा। यस्मिं यस्मिं द्वारे आरम्मणं बलवं होति, तं तं आयतनं तस्मिं तस्मिं आरम्मणे आविञ्छति।

इमं पन उपमं भगवा सरिक्खकेन वा आहरेय्य आयतनानं वा नानत्तदस्सनवसेन। तत्थ **सरिक्खकेन** ताव विसुं अप्पनाकिच्चं नत्थि, पाळियंयेव अप्पिता। **आयतनानं नानत्तदस्सनेन** पन अयं अप्पना – अहि नामेस बहि सित्तसम्मट्ठे ठाने नाभिरमति, सङ्कारट्ठानतिणपण्णगहनवम्मिकानियेव पन पविसित्वा निपन्नकाले अभिरमति, एकग्गतं आपज्जति। एवमेव चक्खुपेतं विसमज्झासयं, मट्ठासु सुवण्णभित्तिआदीसु नाभिरमति, ओलोकेतुम्पि न इच्छति, रूपचित्तपुप्फलतादिविचित्तेसुयेव पन अभिरमति। तादिसेसु हि ठानेसु चक्खुम्हि अप्पहोन्ते मुखम्पि विवरित्वा

ओलोकेतुकामो होति।

सुसुमारोपि बहि निक्खन्तो गहेतब्बं न पस्सति, अक्खिं निमीलेत्वा चरति। यदा पन ब्यामसतमत्तं उदकं ओगाहित्वा बिलं पविसित्वा निपन्नो होति, तदा तस्स चित्तं एकग्गं होति, सुखं सुपति। एवमेव सोतम्पेतं बिलज्झासयं आकाससन्निस्सितं, कण्णच्छिद्दकूपकेयेव अज्झासयं करोति, कण्णच्छिद्दाकासोयेव तस्स सद्दसवने पच्चयो होति। अजटाकासोपि वट्टतियेव। अन्तोलेणस्मिञ्हि सज्झाये कयिरमाने न लेणच्छदनं भिन्दित्वा सद्दो बहि निक्खमति, द्वारवातपानछिद्देहि पन निक्खमित्वा धातुपरम्परा घट्टेन्तो आगन्त्वा सोतपसादं घट्टेति। अथ तस्मिं काले "असुकं नाम सज्झायती"ति लेणपिट्ठे निसिन्ना जानन्ति।

एवं सन्ते सम्पत्तगोचरता होति, किं पनेतं सम्पत्तगोचरन्ति? आम सम्पत्तगोचरं। यदि एवं दूरे भेरिआदीसु वज्जमानेसु "दूरे सद्दो"ति जाननं न भवेय्याति। नो न भवति। सोतपसादस्मिञ्हि घट्टिते "दूरे सद्दो, आसन्ने सद्दो, परतीरे ओरिमतीरे"ति तथा तथा जाननाकारो होति, धम्मता एसाति। किं एताय धम्मताय? यतो यतो छिद्दं, ततो ततो सवनं होति चन्दिमसूरियादीनं दस्सनं वियाति असम्पत्तगोचरमेवेतं।

पक्खीपि रुक्खे वा भूमियं वा न रमति। यदा पन एकं वा द्वे वा लेड्डुपाते अतिक्कम्म अजटाकासं पक्खन्दो होति, तदा एकग्गचित्ततं आपज्जति। एवमेव घानम्पि आकासज्झासयं वातूपनिस्सयगन्धगोचरं। तथा हि गावो नववुट्ठे देवे भूमिं घायित्वा घायित्वा आकासाभिमुखो हुत्वा वातं आकड्ढन्ति। अङ्गुलीहि गन्धपिण्डं गहेत्वापि च उपसिङ्घनकाले वातं अनाकड्ढन्तो नेव तस्स गन्धं जानाति।

कुक्कुरोपि बहि चरन्तो खेमट्ठानं न पस्सति, लेड्डुदण्डादीहि उपद्दुतो होति। अन्तोगामं पविसित्वा उद्धनट्ठाने छारिकं ब्यूहित्वा निपन्नस्स पनस्स फासु होति। एवमेव जिव्हापि गामज्झासया आपोसन्निस्सितरसारम्मणा। तथा हि तियामरत्तिं समणधम्मं कत्वापि पातोव पत्तचीवरमादाय गामं पविसितब्बं होति। सुक्खखादनीयस्स च न सक्का खेळेन अतेमितस्स रसं जानितुं।

सिङ्गालोपि बहि चरन्तो रतिं न विन्दति, आमकसुसाने मनुस्समंसं खादित्वा निपन्नस्सेव पनस्स फासु होति। एवमेव कायोपि उपादिण्णकज्झासयो पथवीसन्निस्सितफोट्ठब्बारम्मणो। तथा हि अञ्ञं उपादिण्णकं अलभमाना सत्ता अत्तनोव हत्थतले सीसं कत्वा निपज्जन्ति। अज्झत्तिकबाहिरा चस्स पथवी आरम्मणग्गहणे पच्चयो होति। सुसन्थतस्सापि हि सयनस्स हेट्ठाठितानम्पि वा फलकानं न सक्का अनिसीदन्तेन वा अनुप्पीळन्तेन वा थद्धमुदुभावो जानितुन्ति अज्झत्तिकबाहिरा पथवी एतस्स फोट्ठब्बजानने पच्चयो होति।

मक्कटोपि भूमियं विचरन्तो नाभिरमति, हत्थसतुब्बेधं पनस्स रुक्खं आरुय्ह विटपपिट्ठे निसीदित्वा दिसाविदिसा ओलोकेन्तस्सेव फासुको होति। एवं मनोपि नानज्झासयो भवङ्गपच्चयो, दिट्ठपुब्बेपि नानारम्मणज्झासयं करोतियेव मूलभवङ्गं पनस्स पच्चयो होतीति अयमेत्थ सङ्खेपो, वित्थारेन पन आयतनानं नानत्तं विसुद्धिमग्गे आयतननिद्देसे वुत्तमेव।

तं चक्खु नाविञ्छतीति तण्हारज्जुकानं आयतनपाणकानं कायगतासतिथम्भे बद्धानं निब्बिसेवनभावं आपन्नत्ता नाकड्ढतीति इमस्मिं सुत्ते पुब्बभागविपस्सनाव कथिता।

११. यवकलापिसुत्तवण्णना

२४८. एकादसमे **यवकलापी**ति लायित्वा ठपितयवपुञ्जो। **ब्याभङ्गिहत्था**ति काजहत्था। **छहि ब्याभङ्गीहि हनेय्यु**न्ति छहि पुथुलकाजदण्डकेहि पोथेय्युं। **सत्तमो**ति तेसु छसु जनेसु यवे पोथेत्वा पसिब्बके पूरेत्वा आदाय गतेसु अञ्ञो सत्तमो आगच्छेय्य। **सुहततरा अस्सा**ति यं तत्थ अवसिट्ठं अत्थि भुसपलापमत्तम्पि, तस्स गहणत्थं सुट्ठुतरं हता।

एवमेव खोति एत्थ चतुमहापथो विय छ आयतनानि दट्ठब्बानि, चतुमहापथे निक्खित्तयवकलापी विय सत्तो, छ ब्याभङ्गियो विय इट्ठानिट्ठमज्झत्तवसेन अट्ठारस आरम्मणानि, सत्तमा ब्याभङ्गी विय भवपत्थना किलेसा। यथा चतुमहापथे ठपिता यवकलापी छहि ब्याभङ्गीहि हञ्ञति, एवमिमे सत्ता अट्ठारसहि आरम्मणदण्डकेहि छसु आयतनेसु हञ्ञन्ति। यथा सत्तमेन सुहततरा होन्ति, एवं सत्ता भवपत्थनकिलेसेहि सुहततरा होन्ति भवेमूलकं दुक्खं अनुभवमाना।

इदानि नेसं तं भवपत्थनकिलेसं दस्सेतुं **भूतपुब्बं, भिक्खवे**तिआदिमाह। **तत्रा**ति सुधम्मायं भुम्मं, सुधम्माय देवसभाय द्वारेति अत्थो। **धम्मिका खो देवा**ति धम्मिका एते देवा नाम, येहि मादिसं असुराधिपतिं गहेत्वा मय्हं भेदनमत्तम्पि न कतन्ति सन्धाय वदति। **अधम्मिका देवा**ति अधम्मिका एते देवा नाम, ये मादिसं असुराधिपतिं नवगूथसूकरं विय कण्ठपञ्चमेहि बन्धनेहि बन्धित्वा निसीदापेन्ति। **एवं सुखुमं खो, भिक्खवे, वेपचित्तिबन्धन**न्ति तं किर पदुमनाळसुत्तं विय मक्कटजालसुत्तं विय च सुखुमं होति, छेत्तुं पन नेव वासिया न फरसुना सक्का। यस्मा पन चित्तेनेव बज्झति, चित्तेन मुच्चति, तस्मा ''वेपचित्तिबन्धन''न्ति वुत्तं।

ततो सुखुमतरं मारबन्धनन्ति किलेसबन्धनं पनेसं ततोपि सुखुमतरं, नेव चक्खुस्स आपाथं गच्छति, न इरियापथं निवारेति। तेन हि बद्धा सत्ता पथवितलेपि आकासेपि योजनसतम्पि योजनसहस्सम्पि गच्छन्तिपि आगच्छन्तिपि। छिज्जमानं पनेतं ञाणेनेव छिज्जति, न अञ्ञेनाति ''ञाणमोक्खं बन्धन''न्तिपि वुच्चति।

मञ्ञमानोति तण्हादिट्ठिमानानं वसेन खन्धे मञ्ञन्तो। **बद्धो मारस्सा**ति मारबन्धनेन बद्धो। करणत्थे वा एतं सामिवचनं, किलेसमारेन बद्धोति अत्थो। **मुत्तो पापिमतो**ति मारस्स बन्धनेन मुत्तो। करणत्थेयेव वा इदं सामिवचनं, पापिमता किलेसबन्धनेन मुत्तोति अत्थो।

अस्मीति पदेन तण्हामञ्ञितं वुत्तं। **अयमहस्मी**ति दिट्ठिमञ्ञितं। **भविस्स**न्ति सस्सतवसेन दिट्ठिमञ्ञितमेव। **न भविस्स**न्ति उच्छेदवसेन। **रूपी**तिआदीनि सस्सतस्सेव पभेददीपनानि। **तस्मा**ति यस्मा मञ्ञितं आबाधं अन्तोदोसनिकन्तनवसेन रोगो चेव गण्डो च सल्लञ्च, तस्मा। **इञ्जित**न्तिआदीनि यस्मा इमेहि किलेसेहि सत्ता इञ्जन्ति चेव फन्दन्ति च पपञ्चिता च होन्ति पमत्ताकारपत्ता, तस्मा तेसं आकारदस्सनत्थं वुत्तानि।

मानगतवारे पन मानस्स गतं **मानगतं,** मानपवत्तीति अत्थो। मानोयेव मानगतं गूथगतं मुत्तगतं विय। तत्थ **अस्मी**ति इदं तण्हाय सम्पयुत्तमानवसेन वुत्तं। **अयमहमस्मी**ति दिट्ठिवसेन। ननु च दिट्ठिसम्पयुत्तो नाम मानो नत्थीति? आम नत्थि, मानस्स पन अप्पहीनत्ता दिट्ठि नाम होति। मानमूलकं दिट्ठिं सन्धायेतं वुत्तं। सेसं सब्बत्थ उत्तानमेवाति।

आसीविसवग्गो।

चतुत्थो पण्णासको।

सळायतनसंयुत्तवण्णना निट्ठिता।

२. वेदनासंयुत्तं

१. सगाथावग्गो

१. समाधिसुत्तवण्णना

२४९. वेदनासंयुत्ते सगाथावग्गस्स पठमे **समाहितो**ति उपचारेन वा अप्पनाय वा समाहितो। **वेदना च पजानाती**ति वेदना दुक्खसच्चवसेन पजानाति। **वेदनानञ्च सम्भव**न्ति तासंयेव सम्भवं समुदयसच्चवसेन पजानाति। **यत्थ चेता**ति यत्थेता वेदना निरुज्झन्ति, तं निब्बानं निरोधसच्चवसेन पजानाति। **खयगामिन**न्ति तासंयेव वेदनानं खयगामिनं मग्गं मग्गसच्चवसेन पजानाति। **निच्छातो परिनिब्बुतो**ति नित्तण्हो हुत्वा किलेसपरिनिब्बानेन परिनिब्बुतो। एवमेत्थ सुत्ते सम्मसनचारवेदना कथिता। गाथासु द्वीहि पदेहि समथविपस्सना कथिता, सेसेहि चतुसच्चं कथितं। एवमेत्थ सब्बसङ्गाहिको चतुभूमकधम्मपरिच्छेदो वुत्तो।

२. सुखसुत्तवण्णना

२५०. दुतिये **अदुक्खमसुखं सहा**ति अदुक्खमसुखञ्च सुखदुक्खेहि सह। **अज्झत्तञ्च बहिद्धा चा**ति अत्तनो च परस्स च। **मोसधम्म**न्ति नस्सनसभावं। **पलोकिन**न्ति पलुज्जनकं भिज्जनसभावं। **फुस्स फुस्स वयं पस्स**न्ति ञाणेन फुसित्वा फुसित्वा वयं पस्सन्तो। **एवं तत्थ विरज्जती**ति एवं तासु वेदनासु विरज्जति। इधापि सुत्ते सम्मसनचारवेदना कथिता, गाथासु ञाणफुसनं।

३. पहानसुत्तवण्णना

२५१. ततिये **अच्छेच्छि तण्ह**न्ति सब्बम्पि तण्हं छिन्दि समुच्छिन्दि। **विवत्तयि संयोजन**न्ति दसविधम्पि संयोजनं परिवत्तयि निम्मूलकमकासि। **सम्मा**ति हेतुना कारणेन। **मानाभिसमया**ति मानस्स दस्सनाभिसमया, पहानाभिसमया च। अरहत्तमग्गो हि किच्चवसेन मानं सम्पस्सति, अयमस्स दस्सनाभिसमयो। तेन दिट्ठो पन सो तावदेव पहीयति, दिट्ठविसेन दिट्ठसत्तानं जीवितं विय। अयमस्स पहानाभिसमयो।

अन्तमकासि दुक्खस्साति एवं अरहत्तमग्गेन मानस्स दिट्ठत्ता च पहीनत्ता च ये इमे ''कायबन्धनस्स अन्तो जीरति (चूळव० २७८) हरितन्तं वा''ति (म० नि० १.३०४) एवं वुत्तअन्तिममरियादन्तो च, ''अन्तमिदं, भिक्खवे, जीविकान''न्ति (इतिवु० ९१; सं० नि० ३.८०) एवं वुत्तलामकन्तो च, ''सक्कायो एको अन्तो''ति (अ० नि० ६.६१; चूळनि० तिस्समेत्तेय्यमाणवपुच्छानिद्देस ११) एवं वुत्तकोट्ठासन्तो च, ''एसेवन्तो दुक्खस्स सब्बपच्चयसङ्ख्या''ति (सं नि० २.५१; २.४.७१; उदा० ७१) एवं वुत्तकोटन्तो चाति चत्तारो अन्ता, तेसु सब्बस्सेव वट्टदुक्खस्स अदुं चतुत्थकोटिसङ्खातं अन्तमकासि, परिच्छेदं परिवटुमं अकासि, अन्तिमसमुस्सयमत्तावसेसं दुक्खमकासीति वुत्तं होति।

सम्पजञ्ञं न रिञ्चतीति सम्पजञ्ञं न जहति। **सङ्ख्यं नोपेती**ति रत्तो दुट्ठो मूळ्होति पञ्ञत्तिं न उपेति, तं पञ्ञत्तिं पहाय खीणासवो नाम होतीति अत्थो। इमस्मिं सुत्ते आरम्मणानुसयो कथितो।

४. पातालसुत्तवण्णना

२५२. चतुत्थे **पातालो**ति पातस्स अलं परियत्तो, नत्थि एत्थ पतिट्ठाति **पातालो। असन्तं अविज्जमान**न्ति असम्भूतत्तं अपञ्ञायमानत्तं। **एवं वाचं भासती**ति अत्थि महासमुद्दे पातालोति एवं वाचं। सो हि यं तं बलवामुखं महासमुद्दस्स उदकं वेगेन पक्खन्दित्वा चक्कवाळं वा सिनेरुं वा आहच्च योजनद्वियोजनदसयोजनप्पमाणम्पि उग्गन्त्वा पुन महासमुद्दे पतति, यस्स पतितट्ठाने महानरकपपातो विय होति, यं लोके बलवामुखन्ति वुच्चति। तं सन्धाय एवं वदति।

यस्मा पन तत्थ तथारूपानं मच्छकच्छपदेवदानवानं पतिट्ठापि होति सुखनिवासोपि, तस्मा असन्तं असंविज्जमानं तं तं वाचं भासति नाम। यस्मा पन सब्बपुथुज्जना सारीरिकाय दुक्खवेदनाय पतिट्ठातुं न सक्कोन्ति, तस्मा पातस्स अलन्ति अत्थेन अयमेव पातालोति दस्सेन्तो **सारीरिकानं खो एतं भिक्खवे**तिआदिमाह।

पाताले न पच्चुट्ठासीति पातालस्मिं न पतिट्ठासि। **गाध**न्ति पतिट्ठं। **अक्कन्दती**ति अनिबद्धं विप्पलापं विलपन्तो कन्दति। **दुब्बलो**ति दुब्बलञाणो। **अप्पथामको**ति ञाणथामस्स परित्तताय परित्तथामको। इमस्मिं सुत्ते अरियसावकोति सोतापन्नो। सोतापन्नो हि एत्थ धुरं, बलवविपस्सको न तिक्खबुद्धि उप्पन्नं वेदनं अननुवत्तित्वा पतिट्ठातुं समत्थो योगावचरोपि वट्टति।

५. दट्ठब्बसुत्तवण्णना

२५३. पञ्चमे **दुक्खतो दट्ठब्बा**ति विपरिणामनवसेन दुक्खतो दट्ठब्बा। **सल्लतो**ति दुक्खापनविनिविज्झनट्ठेन सल्लाति दट्ठब्बा। **अनिच्चतो**ति अदुक्खमसुखा हुत्वा अभावाकारेन अनिच्चतो दट्ठब्बा। **अद्दा**ति अद्दस। **सन्त**न्ति सन्तसभावं।

६. सल्लसुत्तवण्णना

२५४. छट्ठे **तत्रा**ति तेसु द्वीसु जनेसु। **अनुवेधं विज्झेय्या**ति तस्सेव वणमुखस्स अङ्गुलन्तरे वा द्वङ्गुलन्तरे वा आसन्नपदेसे अनुगतवेधं। एवं विद्धस्स हि सा अनुवेधा वेदना पठमवेदनाय बलवतरा होति, पच्छा उप्पज्जमाना दोमनस्सवेदनापि एवमेव पुरिमवेदनाय बलवतरा होति। **दुक्खाय वेदनाय निस्सरण**न्ति दुक्खाय वेदनाय हि समाधिमग्गफलानि निस्सरणं, तं सो न जानाति, कामसुखमेव निस्सरणन्ति जानाति। **तासं वेदनान**न्ति तासं सुखदुक्खवेदनानं। **सञ्ञुत्तो नं वेदयती**ति किलेसेहि सम्पयुत्तोव हुत्वा तं वेदनं वेदयति, न विप्पयुत्तो। **सञ्ञुत्तो दुक्खस्मा**ति करणत्थे निस्सक्कं, दुक्खेन सम्पयुत्तोति अत्थो। **सङ्खातधम्मस्सा**ति विदितधम्मस्स तुलितधम्मस्स। **बहुस्सुतस्सा**ति परियत्तिबहुस्सुतस्स पटिवेधबहुस्सुतस्स च। **सम्मा पजानाति भवस्स पारगू**ति भवस्स पारं निब्बानं गतो, तदेव निब्बानं सम्मा पजानाति। इमस्मिम्पि सुत्ते आरम्मणानुसयोव कथितो। अरियसावकेसु च खीणासवो एत्थ धुरं, अनागामीपि वट्टतीति वदन्ति।

७. पठमगेलञ्ञसुत्तवण्णना

२५५. सत्तमे **येन गिलानसाला तेनुपसङ्कमी**ति ''सदेवके लोके अग्गपुग्गलो तथागतोपि गिलानुपट्ठानं गच्छति, उपट्ठातब्बयुत्तका नाम गिलानाति भिक्खू सद्दहित्वा ओकप्पेत्वा गिलाने उपट्ठातब्बे मञ्ञिस्सन्ती''ति च ''ये तत्थ कम्मट्ठानसप्पाया, तेसं कम्मट्ठानं कथेस्सामी''ति च चिन्तेत्वा उपसङ्कमि। **काये कायानुपस्सी**तिआदीसु यं वत्तब्बं, तं परतो वक्खाम। **अनिच्चानुपस्सी**ति अनिच्चतं अनुपस्सन्तो। **वयानुपस्सी**ति वयं अनुपस्सन्तो। **विरागानुपस्सी**ति विरागं

अनुपस्सन्तो। **निरोधानुपस्सी**ति निरोधं अनुपस्सन्तो। **पटिनिस्सग्गानुपस्सी**ति पटिनिस्सग्गं अनुपस्सन्तो।

एत्तावता किं दस्सितं होति? इमस्स भिक्खुनो आगमनीयपटिपदा, सतिपट्ठानापि हि पुब्बभागायेव, सम्पजञ्ञेपि अनिच्चानुपस्सना वयानुपस्सना विरागानुपस्सनाति च इमापि तिस्सो अनुपस्सना पुब्बभागायेव, निरोधानुपस्सनापि पटिनिस्सग्गानुपस्सनापि इमा द्वे मिस्सका। एत्तावता इमस्स भिक्खुनो भावनाकालो दस्सितोति। सेसं वुत्तनयमेव।

८-९. दुतियगेलञ्ञसुत्तादिवण्णना

२५६-२५७. अट्ठमे **इममेव फस्सं पटिच्चा**ति वुत्ते बुज्झनकानं अज्झासयेन वुत्तं, अत्थतो पनेतं निन्नानाकरणं। कायोव हि एत्थ फस्सोति वुत्तो। नवमं उत्तानमेव।

१०. फस्समूलकसुत्तवण्णना

२५८. दसमे **सुखवेदनिय**न्ति सुखवेदनाय पच्चयभूतं। सेसेसुपि एसेव नयो। अनुपदवण्णना पनेत्थ हेट्ठा वित्थारिताव। इमस्मिं सुत्तद्वये सम्मसनचारवेदना कथिता।

सगाथावग्गो पठमो।

२. रहोगतवग्गो

१. रहोगतसुत्तवण्णना

२५९. रहोगतवग्गस्स पठमे **यं किञ्चि वेदयितं, तं दुक्खस्मि**न्ति यं किञ्चि वेदयितं, तं सब्बं दुक्खन्ति अत्थो। **सङ्खारानंयेव अनिच्चत**न्तिआदीसु या एसा सङ्खारानं अनिच्चता खयधम्मता वयधम्मता विपरिणामधम्मता, एतं सन्धाय यं किञ्चि वेदयितं, तं दुक्खन्ति मया भासितन्ति दीपेति। या हि सङ्खारानं अनिच्चता, वेदनानम्पि सा अनिच्चता एव। अनिच्चता च नामेसा मरणं, मरणतो उत्तरि दुक्खं नाम नत्थीति इमिना अधिप्पायेन सब्बा वेदना दुक्खाति वुत्ता। **अथ खो पन भिक्खु मया**ति इदं न केवलं अहं वेदनानंयेव निरोधं पञ्ञापेमि, इमेसम्पि धम्मानं निरोधं पञ्ञापेमीति दस्सनत्थं आरद्धं। वूपसमो च पस्सद्धियो च एवरूपाय देसनाय बुज्झनकानं अज्झासयेन वुत्ता। सञ्ञावेदयितनिरोधग्गहणेन चेत्थ चत्तारो आरुप्पा गहिताव होन्तीति वेदितब्बा।

२-३. पठमआकाससुत्तादिवण्णना

२६०-२६१. दुतिये **पुथू वायन्ति मालुता**ति बहू वाता वायन्ति। सेसं उत्तानत्थमेवाति। ततियं विना गाथाहि बुज्झन्तानं अज्झासयेन वुत्तं।

४. अगारसुत्तवण्णना

२६२. चतुत्थे **पुरत्थिमा**ति पुरत्थिमाय। एवं सब्बत्थ। **सामिसापि सुखा वेदना**तिआदीसु **सामिसा सुखा** नाम कामामिसपटिसंयुत्ता वेदना। **निरामिसा सुखा** नाम पठमज्झानादिवसेन विपस्सनावसेन अनुस्सतिवसेन च उप्पन्ना

वेदना। **सामिसा दुक्खा** नाम कामामिसेनेव सामिसा वेदना, **निरामिसा दुक्खा** नाम अनुत्तरेसु विमोक्खेसु पिहं उपट्ठापयतो पिहपच्चया उप्पन्नदोमनस्सवेदना। **सामिसा अदुक्खमसुखा** नाम कामामिसेनेव सामिसा वेदना। **निरामिसा अदुक्खमसुखा** नाम चतुत्थज्झानवसेन उप्पन्ना अदुक्खमसुखा वेदना।

५-८. पठमआनन्दसुत्तादिवण्णना

२६३-२६६. पञ्चमादीनि चत्तारि हेट्ठा कथितनयानेव। पुरिमानि पनेत्थ द्वे परिपुण्णपस्सद्धिकानि, पच्छिमानि उपड्ढपस्सद्धिकानि। देसनाय बुज्झनकानं अज्झासयेन वुत्तानि।

९-१०. पञ्चकङ्गसुत्तादिवण्णना

२६७-२६८. नवमे **पञ्चकङ्गो थपती**ति **पञ्चकङ्गो**ति तस्स नामं, वासिफरसुनिखादनदण्डमुग्गरकाळसुत्तनाळिसङ्खातेहि वा पञ्चहि अङ्गेहि समन्नागतत्ता सो पञ्चकङ्गोति पञ्ञातो। **थपती**ति वड्ढकीजेट्ठको। **उदायी**ति पण्डितउदायित्थेरो। **परियाय**न्ति कारणं। **द्वेपानन्दा**ति द्वेपि, आनन्द, **परियायेना**ति कारणेन। एत्थ च कायिकचेतसिकवसेन द्वे वेदितब्बा, सुखादिवसेन तिस्सोपि, इन्द्रियवसेन सुखिन्द्रियादिका पञ्च, द्वारवसेन चक्खुसम्फस्सजादिका छ, उपविचारवसेन ''चक्खुना रूपं दिस्वा सोमनस्सठानियं रूपं उपविचरती''तिआदिका अट्ठारस, छ गेहसितानि सोमनस्सानि, छ नेक्खम्मसितानि, छ गेहसितानि दोमनस्सानि, छ नेक्खम्मसितानि, छ गेहसिता उपेक्खा, छ नेक्खम्मसिताति एवं छत्तिंस। ता अतीते छत्तिंस, अनागते छत्तिंस, पच्चुप्पन्ने छत्तिंसाति एवं अट्ठसतं वेदना वेदितब्बा।

पञ्चिमे आनन्द कामगुणाति अयं पाटियेक्को अनुसन्धि। न केवलञ्हि द्वे आदिं कत्वा वेदना भगवता पञ्ञत्ता, परियायेन एकापि वेदना कथिता, तं दस्सेन्तो पञ्चकङ्गस्स थपतिनो वादं उपत्थम्भेतुं इमं देसनं आरभि। **अभिक्कन्ततर**न्ति सुन्दरतरं। **पणीततर**न्ति अतप्पकतरं। एत्थ च चतुत्थज्झानतो पट्ठाय अदुक्खमसुखा वेदना, सापि सन्तट्ठेन पणीतट्ठेन च सुखन्ति वुत्ता। निरोधो अवेदयितसुखवसेन सुखं नाम जातो। पञ्चकामगुणवसेन हि अट्ठसमापत्तिवसेन च उप्पन्नं वेदयितं सुखं नाम, निरोधो अवेदयितसुखं नाम। इति वेदयितसुखं वा होतु अवेदयितसुखं वा, निद्दुक्खभावसङ्खातेन सुखट्ठेन एकन्तसुखमेव जातं।

यत्थ यत्थाति यस्मिं यस्मिं ठाने। **सुखं उपलब्भती**ति वेदयितं सुखं वा अवेदयितं सुखं वा उपलब्भति। **तं तं तथागतो सुखस्मिं पञ्ञपेति,** तं सब्बं तथागतो निद्दुक्खभावं सुखस्मिंयेव पञ्ञपेतीति इध भगवा निरोधसमापत्तिं सीसं कत्वा नेय्यपुग्गलस्स वसेन अरहत्तनिकूटेनेव देसनं निट्ठापेसि। दसमं उत्तानत्थमेवाति।

रहोगतवग्गो दुतियो।

३. अट्ठसतपरियायवग्गो

१. सीवकसुत्तवण्णना

२६९. ततियवग्गस्स पठमे **मोळियसीवको**ति **सीवको**ति तस्स नामं। चूळा पनस्स अत्थि, तस्मा मोळियसीवकोति

वुच्चति। **परिब्बाजको**ति छन्नपरिब्बाजको। **पित्तसमुट्ठानानी**ति पित्तपच्चयानि। **वेदयितानी**ति वेदना। तत्थ पित्तपच्चया तिस्सो वेदना उप्पज्जन्ति। कथं? एकच्चो हि ''पित्तं मे कुपितं दुज्जानं खो पन जीवित''न्ति दानं देति, सीलं समादियति उपोसथकम्मं करोति, एवमस्स कुसलवेदना उप्पज्जति। एकच्चो ''पित्तभेसज्जं करिस्सामी''ति पाणं हनति, अदिन्नं आदियति, मुसा भणति, दस दुस्सील्यकम्मानि करोति, एवमस्स अकुसलवेदना उप्पज्जति। एकच्चो ''एत्तकेनपि मे भेसज्जकरणेन पित्तं न वूपसम्मति, अलं यं होति. तं होतू''ति मज्झत्तो कायिकवेदनं अधिवासेन्तो निपज्जति, एवं अस्स अब्याकतवेदना उप्पज्जति।

सामम्पि खो एतन्ति तं तं पित्तविकारं दिस्वा अत्तनापि एतं वेदितब्बं। **सच्चसम्मत**न्ति भूतसम्मतं। लोकोपि हिस्स सरीरे सबलवण्णतादिपित्तविकारं दिस्वा ''पित्तमस्स कुपित''न्ति जानाति। **तस्मा**ति यस्मा सामञ्च विदितं लोकस्स च सच्चसम्मतं अतिधावन्ति, तस्मा। **सेम्हसमुट्ठाना**दीसुपि एसेव नयो। एत्थ पन **सन्निपातिकानी**ति तिण्णम्पि पित्तादीनं कोपेन समुट्ठितानि। **उतुपरिणामजानी**ति विसभागउतुतो जातानि। जङ्गलदेसवासीनञ्हि अनुपदेसे वसन्तानं विसभागो उतु उप्पज्जति, अनुपदेसवासीनञ्च जङ्गलदेसेति एवं मलयसमुद्दतीरादिवसेनापि उतुविसभागता उप्पज्जतियेव। ततो जाताति उतुपरिणामजातानि नाम।

विसमपरिहारजानीति महाभारवहनसुधाकोट्टनादितो वा अवेलाय चरन्तस्स सप्पडंसकूपपातादितो वा विसमपरिहारतो जातानि। **ओपक्कमिकानी**ति ''अयं चोरो वा पारदारिको वा''ति गहेत्वा जण्णुककप्परमुग्गरादीहि निप्पोथनउपक्कमं पच्चयं कत्वा उप्पन्नानि। एतं बहि उपक्कमं लभित्वा कोचि वुत्तनयेनेव कुसलं करोति, कोचि अकुसलं, कोचि अधिवासेन्तो निपज्जति। **कम्मविपाकजानी**ति केवलं कम्मविपाकतो, जातानि। तेसुपि हि उप्पन्नेसु वुत्तनयेनेव कोचि कुसलं करोति, कोचि अकुसलं, कोचि अधिवासेन्तो निपज्जति। एवं सब्बवारेसु तिविधाव वेदना होन्ति।

तत्थ पुरिमेहि सत्तहि कारणेहि उप्पन्ना सारीरिका वेदना सक्का पटिबाहितुं, कम्मविपाकजानं पन सब्बभेसज्जानिपि सब्बपरित्तानिपि नालं पटिघाताय। इमस्मिं सुत्ते लोकवोहारो नाम कथितोति।

२-१०. अट्ठसतसुत्तादिवण्णना

